## (717) "तिक्र गतौ" (I-भ्वादिः-105. सक. सेट्. आत्म.)

तेककः-किका, तेककः-किका, तितेकिषकः-तितिकिषकः-षिका, तेतिककः, किका ; तेकिता-त्री, तेकयिता-त्री, तितेकिषिता-तितिकिषिता-त्री, तेतिकिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि तिकधातुवत् (716) ज्ञेयानि। अस्य धातोः भ्वादौ आत्मनेपदिषु पाठात् तेकमानः, तेकिष्यमाणः, तितेकिषमाणः-तितिकिषमाणः ; इत्यादीनि रूपाणि शानचि भवन्तीति विशेषः ।

## (718) "तिग गतौ च" (V-स्वादिः-1267. सक. सेट्. पर.)

चकारात् 'आस्कन्दने' इति संबध्यते ।

तेगकः-गिका, तेगकः-गिका, तितेगिषकः-तितिगिषकः-षिका, तेतिगकः-गिका ; तेगिता-त्री, तेगयिता-त्री, तितेगिषिता-तितिगिषिता-त्री, तेतिगिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि तिकधातुवत् (716) ऊह्यानि। शतरि–तिग्नुवन्[A]।

## (719) "तिज निशाने" (I-भ्वादिः-971. सक. सेट्. आत्म.)

**निशानम्=तीक्ष्णीकरणम्। 'क्षमायां च' इति क्षीरस्वामी ।**

[1]तितिक्षकः-क्षिका, तितिक्षकः[2]-क्षिका, तितिक्षिषकः[3]-षिका, [4]तेजकः-जिका ;

---

1. 'गुप्तिज्किद्भ्यः सन्' (3-1-5) इति नित्यं सन्। 'सनाद्यन्ता धातवः' (3-1-32) इति धातुसंज्ञायाम्, 'सन्यङोः' (6-1-9) इति द्वित्वम्। अभ्यासकार्याणि। 'खरि च' (8-4-55) इति चर्त्वेन जकारस्य ककारः। अस्य सनः 'धातोः' इत्यधिकृत्य विधानाभावात् नार्धधातुकत्वम्। तेन इड्गुणौ न भवतः 'तिज निशाने' इत्युक्तेऽपि, 'तिजेः क्षमायाम्' इति वृत्तिकारवचनात् (3-1-5) क्षमायां नित्यसन्नन्तः प्रयोगार्हः। अर्थान्तरे तु अनुबन्धकाश्चुरादयः। अत्र, अस्यानुदात्तेत्त्वात् आत्मनेपदमेव ।
2. स्वार्थसन्नन्तात् प्रयोजकणिचि, ण्वुलि, 'णेरनिटि' (6-4-52) इति णिलोपे रूपम्। एवं ण्यन्तेऽत्र सर्वत्र प्रक्रिया ज्ञेया ।
3. स्वार्थसन्नन्तात् 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' (3-1-7) इति इच्छासनि रूपम्। न च 'सन्नन्तान्न सनिष्यते ॥' (भाष्येष्टिः 3-1-7) इत्युक्तेः कथमत्र पुनः सन्? इति शङ्कनीयम्। तत्र समानार्थकस्यैव सनः पुनरुत्पत्तिनिषेधे तात्पर्यात्। 'शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः। सरूपः प्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते ॥' इति किल तत्रोक्तम्।
4. 'अर्थान्तरेऽनुबन्धकाश्चुरादयः' इति सिद्धान्तकौमुद्यादिषूक्तत्वात् निशानरूपार्थे चुरादिः। तदानीं स्वार्थसनोऽभावे रूपम्। एवमुत्तरत्रापि ज्ञेयम्।

A. 'तामातिक्य पदे पदेन चिबुके चातिग्नुवन् पाणिना
चक्रे सध्नुवतां वधे दधृगसात्रृज्वीं मनोज्ञाकृतिम्।' धा. का. 2. 70.